वाक्येषु निरपेक्षफलश्रुतेः कामनाभेदाच्च कर्त्रैक्यं ततश्च सर्वशब्देन प्रकृतवाचिना निरपेक्षाणामेव पुत्रादिफलानां दर्शपौर्णमाससम्बन्धेऽवगते प्रयोगभेदादेव भवतु तत्र तत्तत्फलसिद्धिः तथाच तदधिकरणसिद्धान्तसूत्रं “योगसिद्धिर्वा अर्थस्योत्पत्त्यसंयोगित्वात्” जैमि०। अस्यार्थः वाशब्दः सिद्धान्तद्योतनार्थः सर्वेभ्यो दर्शपौर्णमासावित्यत्रार्थस्य तत्तत्फलस्य योगेन प्रयोगभेदेन सिद्धिः उत्पत्त्यसंयोगित्वात् सर्वशब्दानुकर्षणीयानां यः पुत्रकामो यः पशुकाम इत्याद्युत्पत्तिवाक्ये फलानां युगपदसम्बन्धात्। न चार्थस्य नानाविधस्य उत्पत्त्यसंयोगित्वात् महेन्द्रादितत्तल्लोकवासादीनां एकदोत्पत्त्यसम्भवादिति व्याख्यानं युक्तमिति वाच्यं तडागोत्सर्गादौ एकस्मात् कर्मणः क्रमिकनानाफलोक्तेः”। “तथेहापि सर्वनामपदाभावादार्थवादिकफलानि समुच्चितान्येव कामनाविषयो लाघवात् आर्थवादिकसमुच्चितनानाफलविषयकविधिरप्येक एव कल्प्यते लाघवात् न हि निमित्तसाधारण्ये बाधकं विना नैमित्तिकानां पर्य्यायता सम्भवति वह्निसामीप्ये दाहप्रकाशयोः पर्य्यायताया अदर्शनात्। तस्मात् सकृदनुष्ठितेन कर्मणा यथैकं फलं निष्पाद्यते तथा बाधकं विना फलान्तरमपि विनिगमकाभावात्। ज्योतिष्टोमादिस्तु षष्टिधर्मावच्छिन्नफलश्रुतेः पृथगनुष्ठानादेव पृथक् फलसिद्धिः अन्यथा षष्टिसंख्याद्यभिधानं व्यर्थं स्यात्। यत्र तु कर्मफले कालविशेषो नोक्तस्तत्रापि तत्कर्मसमाप्त्यादिकालरूपेण कालविशेषो बोध्यः “फलस्य कर्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः फलविशेषः स्यादिति” न्यायात्। तेषां कर्मणां लोकवत् कृष्यादिवत्। तथाच भवदेवभट्टाः “एकस्मै वा कामायान्ये यज्ञक्रतव आह्रियन्ते” इति संकीर्त्य “सर्वेभ्यो दर्शपौर्णमासाविति” प्रयोगभेदविधानाद् भवतु तत्र पृथगनुष्ठानसाध्यत्वं ब्रह्मवधप्रायश्चित्ते तथाभूतपृथगनुष्ठानसाध्यत्वप्रतिपादकवचनाभावात् अनेकफलानाञ्च तन्त्रेण दशहरान्यायेन एककामनाविषयतासम्भवात् तन्त्रत्वम्” इत्याहुः। हरिनाथोपाध्यायास्तु “इष्टोद्वर्गफलान्युद्दिश्यैतानि चार्थवादिकफलानि समुच्चितान्येव कामनाविषयः, पुरुषविशेषणत्वस्य कल्प्यत्वात् तथाच मिलितानामेककामनाविषयत्वकल्पना अग्नीषोमयोरिव देवतात्वे लाघवन्यायस्य विशिष्टत्वाद्” इत्याहुः। अथ वा “य एतां रात्रीमधीयीत तस्य पितरो घृतकुल्याः मधुकुल्याः वा क्षरन्ते” इत्यत्रापि वैकल्पिकान्वयोपगमे जातेष्टिनयभङ्गप्रसङ्गात् लाघवादिकल्पेऽदृष्टदोषाच्च एकस्य कार्यस्य नियोज्याकाङ्क्षायां सकलार्थवादोपस्थितफलकामो यथैक एव नियोज्यः स्वीकृतस्तथात्रापीति। अथानुत्पन्नब्रह्महत्यादिपातकायास्तत्पूतत्वरूपफलबाधात् तत्तत्कामनाविरहेणानधिकारः स्यादिति चेत् उक्तयुक्त्या समुच्चितफलसिद्धेरन्यथासिद्धार्थवादबलेन सन्दिग्धपापकामनया एवाधिकारो मङ्गलवत्। सति जन्मान्तरीये तादृशपातके संसर्गादिकृते वा तद्ध्वंसोऽपि जायते असति तु न तथा प्रतियोगिरूपसहकारिविरहात् निर्विघ्नस्य कृतमङ्गलवत्” शु०त० रघु०। “समुच्चितफलककर्मणोऽपि प्रत्येकफलकामनया करणे तत्तत्कामनासहकारेण प्रत्येकफलजनकत्वम्” विधिस्वरूपे गदा०। [त्रि०।

**सहरसा** स्त्री सह रसेन। १मुद्गपर्ण्यां शब्दर०। २रसान्विते

**सहर्ष** पु० सह हर्षेण समानो वा हर्षो यत्र। १स्पर्द्धने २हर्षे च त्रिका०। ३हर्षयुक्ते त्रि०।

**सहस्** न० सह–असि। १बले २ज्योतिषि च शब्दर०। ३मार्गशीर्षे मासि पु० अमरः। “सहसा सहसा कृतवेपथुरिति” माघः।

**सहसा** अव्य० सह+सो–डा। १हठादित्यर्थे अमरः। २अकस्मादित्यर्थे शब्दर०। ३हास्ययुते त्रि० “न सहसा सहसा परिरभ्य तम्” माघः।

**सहस्य** पु० सहसे बलाय हितः यत्। पौषमासे अमरः।

**सहस्र** न० समानं हसति हस–र। १दशशतसङ्ख्यायां २बहुसंख्यायां ३तत्संख्यान्विते च हेमच०।

सहस्रसंख्यकाश्च केचित् पदार्थाः कविकल्प० यथा “गङ्गावक्त्रं शेषमूर्द्धा पद्मदलम् रविकरः कार्त्तवीर्य्यबाहुः वेदशाखा शक्रनयनम्”। “तत्र बहुसंख्यत्वे सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपाद्” श्रुतिः। बहुशीर्षादिपरत्वमत्र भाष्यादावुक्तम्। संख्यासंख्येययोः परत्वेऽस्य सर्वदैकवचनत्वम् यथा घटानां सहस्रं सहस्रं घटा इत्यादि आवृत्तौ तु द्वित्वादिकं यथा द्वे सहस्रे त्रीणि सहस्राणीति “दत्त्वाप्याहुः सहस्राणि” मनुः।

**सहस्रकर** पु० सहस्रं कराः किरणा अस्य। १सूर्ये सहस्रकिरणादयोऽप्यत्र हला०। २अर्कवृक्षे च।

**सहस्रकाण्डा** स्त्री सहस्रं बहवः काण्डा यस्याः। श्वेतदूर्वायां राजनि०।

**सहस्रदंष्ट्र** पुंस्त्री० सहस्रं बहुसंख्या दंष्ट्रा अस्य। पाठीन-